ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

हरिः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

## प्रथमकाण्डे द्वितीयः प्रश्नः

# Table of Contents

**1 कृष्ण यजुर्वेदीय तैत्तिरिय संहितायामं पद पाठे प्रथमं काण्डं ..... 3**

**1.2 प्रथमकाण्डे द्वितीयः प्रश्नः (अग्निष्टोमे क्रयः) .................... 3**

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरिय संहितायामं पद पाठे प्रथमं काण्डं

## 1.2 प्रथमकाण्डे द्वितीयः प्रश्नः (अग्निष्टोमे क्रयः)

**1.2.1.1**

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैन॑ स्वधिते मैन॑ं हि॑ंसी र्देवश्रूरेतानि प्र वपे स्वस्त्युत्तराण्यशीयाऽऽपो अस्मान् मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत् प्र वहन्तु रिप्रमुदाभ्यः शुचिरा पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयोऽसि वर्चोधा असि वर्चो – [ ] 1

**1.2.1.1**

आपः । उन्दन्तु । जीवसे । दीर्घायुत्वायेति दीर्घायु – त्वाय । वर्चसे । ओषधे । त्रायस्व । एनम् । स्वधित इति स्व–धिते । मा । एनम् ।

हि॒ꣳसीः । दे॒वश्रूरिति॒ देव – श्रूः । ए॒तानि॑ । प्रेति॑ । व॒पे । स्व॒स्ति ।
उत्त॒राणीत्युत् – त॒रा॒णि । अ॒शी॒य । आपः॑ । अ॒स्मान् । मा॒तरः॑ ।
शु॒न्ध॒न्तु॒ । घृ॒तेन॑ । नः॒ । घृ॒त॒पु॒व इति॑ घृत–पु॒वः॑ । पु॒न॒न्तु॒ । विश्व॑म् ।
अ॒स्मत् । प्रेति॑ । व॒ह॒न्तु॒ । रि॒प्रम् । उदिति॑ । आ॒भ्यः॒ । शुचिः॑ । एति॑ ।
पू॒तः । ए॒मि॒ । सोम॑स्य । त॒नूः । अ॒सि॒ । त॒नु॒व॑म् । मे॒ । पा॒हि॒ ।
म॒ही॒नाम् । पयः॑ । अ॒सि॒ । व॒र्चो॒धा इति॑ वर्चः – धाः ।
अ॒सि॒ । वर्चः॑ । **1 (50)**

**1.2.1.2**

मयि॑ धेहि वृ॒त्रस्य॑ क॒नीनि॑काऽसि चक्षु॒ष्पा अ॑सि॒ चक्षु॑र्मे पाहि
चि॒त्पति॑स्त्वा पुनातु वा॒क्पति॑स्त्वा पुनातु दे॒वस्त्वा॑ सवि॒ता
पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒ वसोः॒ सूर्य॑स्य र॒श्मिभि॒स्तस्य॑ ते पवित्रपते
प॒वित्रे॑ण॒ यस्मै॒ कं पु॒ने तच्छ॑केय॒मा वो॑ देवास ईमहे॒ सत्यधर्माणो
अध्व॒रे यद्वो॑ देवास आगु॒रे यज्ञि॑यासो॒ हवा॑मह॒ इन्द्रा॑ग्नी॒ द्यावा॑ पृथिवी॒
आप॑ ओषधी॒ ( ) स्त्वं दी॒क्षाणा॒–मधि॑पतिरसी॒ह मा॒ सन्त॑ं पाहि ॥ **2**

**1.2.1.2**

मयि । धेहि । वृत्रस्य । कनीनिका । असि । चक्षुष्पा इति चक्षुः–पाः। असि । चक्षुः । मे । पाहि । चित्पतिरिति चित् – पतिः । त्वा । पुनातु । वाक्पतिरिति वाक् – पतिः । त्वा । पुनातु । देवः । त्वा । सविता । पुनातु । अच्छिद्रेण । पवित्रेण । वसोः । सूर्यस्य । रश्मिभिरिति रश्मि – भिः । तस्य । ते । पवित्रपत इति पवित्र–पते । पवित्रेण । यस्मै । कम् । पुने । तत् । शकेयम् । एति । वः । देवासः । ईमहे । सत्यधर्माण इति सत्य – धर्माणः । अध्वरे । यत् । वः । देवासः । आगुर इत्या – गुरे । यज्ञियासः । हवामहे । इन्द्राग्नी इतीन्द्र – अग्नि । द्यावापृथिवी इति द्यावा – पृथिवी । आपः । ओषधीः( ) । त्वम् । दीक्षाणाम् । अधिपतिरित्यधि – पतिः । असि । इह । मा । सन्तम् । पाहि ॥ **2 (58) (वर्च – ओषधीरष्टौ च )** *(A1)*

**1.2.2.1**

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहाऽऽपो देवीर्बृहती

र्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं ँविश्वे राय इषुध्यसि द्युम्नं ँवृणीत पुष्यसे स्वाहर्ख्–सामयोः शिल्पे स्थस्ते वामा रभे ते मा – [ ] 3

**1.2.2.1**

आकूत्या इत्या – कूत्यै । प्रयुज इति प्र – युजे । अग्नये । स्वाहा । मेधायै । मनसे । अग्नये । स्वाहा । दीक्षायै । तपसे । अग्नये । स्वाहा । सरस्वत्यै । पूष्णे । अग्नये । स्वाहा । आपः । देवीः । बृहतीः । विश्वशंभुव इति विश्व – शंभुवः । द्यावापृथिवी इति द्यावा – पृथिवी । उरु । अन्तरिक्षम् । बृहस्पतिः । नः । हविषा । वृधातु । स्वाहा । विश्वे । देवस्य । नेतुः । मर्तः । वृणीत । सख्यम् । विश्वे । रायः । इषुध्यसि । द्युम्नम् । वृणीत । पुष्यसे । स्वाहा । ऋख्सामयोरित्यृक् –सामयोः । शिल्पे इति । स्थः । ते इति । वाम् । एति । रभे । ते इति । मा । **3 (50)**

**1.2.2.2**

पातमास्य यज्ञस्योदृच इमां धिय९ शिक्षमाणस्य देव क्रतुं

दक्षं ँवरुण स९शिशाधि ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि

नाव९ रुहेमोर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा

हि९सी–र्विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ

नक्षत्राणां माऽतीकाशात् पाहीन्द्रस्य योनिरसि – [ ] 4

**1.2.2.2**

पातम् । एति । अस्य । यज्ञस्य । उदृच इत्युत् – ऋचः । इमाम् ।

धियम् । शिक्षमाणस्य । देव । क्रतुम् । दक्षम् । वरुण । समिति ।

शिशाधि । यया । अतीति । विश्वा । दुरितेति दुः – इता । तरेम ।

सुतर्माणमिति सु –तर्माणम् । अधीति । नावम् । रुहेम । ऊर्क् ।

असि । आङ्गिरसी । ऊर्णम्रदा इत्यूर्ण – म्रदाः । ऊर्जम् । मे ।

यच्छ । पाहि । मा । मा । मा । हि९सीः । विष्णोः । शर्म । असि ।

शर्म । यजमानस्य । शर्म । मे । यच्छ । नक्षत्राणाम् । मा ।

अतीकाशात् । पाहि । इन्द्रस्य । योनिः । असि । 4 (50)

**1.2.2.3**

मा मा हि॒ꣳसीः कृ॒ष्यै त्वा सुस॒स्यायै सुपिप्प॒लाभ्य॒–स्त्वौषधीभ्यः सू॒पस्था दे॒वो व॒नस्पति॒रूर्ध्वो मा पा॒ह्योदृ॒चः स्वाहा य॒ज्ञं मनसा॒ स्वाहा॒ द्यावापृथि॒वीभ्या॒ꣳ॒ स्वाहो॒रो–र॒न्तरिक्षा॒थ् स्वाहा य॒ज्ञं ँवाता॒दा रभे ॥ **5**

**1.2.2.3**

मा । मा॒ । हि॒ꣳ॒सीः॒ । कृ॒ष्यै । त्वा॒ । सु॒स॒स्याया॒ इति सु – स॒स्यायै । सु॒पि॒प्प॒लाभ्य॒ इति सु – पि॒प्प॒लाभ्यः । त्वा॒ । ओषधीभ्य॒ इत्योषधि – भ्य॒ः । सू॒पस्था इति सु – उ॒पस्थाः । दे॒वः । व॒नस्पतिः । ऊ॒र्ध्वः । मा॒ । पा॒हि॒ । एति । उ॒दृ॒च इत्युत् – ऋचः । स्वाहा । य॒ज्ञम् । मनसा । स्वाहा । द्यावापृथि॒वीभ्या॒मिति॒ द्यावा–पृ॒थि॒वीभ्याम् । स्वाहा । उ॒रोः । अ॒न्तरिक्षात् । स्वाहा । य॒ज्ञम् । वातात् । एति । र॒भे॒ ॥ **5 (30)** **( मा॒ – योनिरसि – त्रि॒ꣳ॒शच्च )** *(A2)*

**1.2.3.1**

दैवीं॒ धियं मनामहे सुमृडी॒का–म॒भिष्टये वर्चो॒धां ँय॒ज्ञवाहसꣳ सुपा॒रा नो असद्॒ वशे । ये दे॒वा मनोजाता मनो॒युजः सु॒दक्षा॒ दक्षपिता॒रस्ते

नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहाऽग्ने त्व॒ सु जागृहि वय॒ सु मन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः ।
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं – [ ] **6**

**1.2.3.1**

दैवीम् । धियम् । मनामहे । सुमृडीकामिति सु – मृडीकाम् ।
अभिष्टये। वर्चोधामिति वर्चः – धाम् । यज्ञवाहसमिति
यज्ञ – वाहसम् । सुपारेति सु – पारा । नः । असत् । वशे ॥ ये ।
देवाः । मनोजाता इति मनः–जाताः । मनोयुज इति मनः – युजः ।
सुदक्षा इति सु – दक्षाः । दक्षपितार इति दक्ष– पितारः । ते । नः ।
पान्तु । ते । नः । अवन्तु । तेभ्यः । नमः । तेभ्यः । स्वाहा । अग्ने ।
त्वम् । स्विति । जागृहि । वयम् । स्विति । मन्दिषीमहि । गोपाय ।
नः । स्वस्तये । प्रबुध इति प्र – बुधे । नः । पुनः । ददः ॥ त्वम् ।
अग्ने । व्रतपा इति व्रत – पाः । असि । देवः । एति । मर्त्येषु ।
आ ॥ त्वम् । **6 (50)**

**1.2.3.2**

यँज्ञेष्वीड्यः ॥

विश्वे देवा अभि मामाऽववृत्रन् पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदा वा रास्वेयथ् सोमा ऽऽ*भूयो भर मा पृणन् पूर्त्या वि राधि माऽहमायुषा चन्द्रमसि मम भोगाय भव वस्त्रमसि मम भोगाय भवोस्राऽसि मम भोगाय भव हयोऽसि मम भोगाय भव–[ ] **7**

**1.2.3.2**

यज्ञेषु । ईड्यः ॥ विश्वे । देवाः । अभीति । माम् । एति । अववृत्रन्न् । पूषा । सन्या । सोमः । राधसा । देवः । सविता । वसोः । वसुदावेति वसु – दावा । रास्व । इयत् । सोम । एति । भूयः । भर । मा । पृणन्न् । पूर्त्या । वीति । राधि । मा । अहम् । आयुषा । चन्द्रम् । असि । मम । भोगाय । भव । वस्त्रम् । असि । मम । भोगाय । भव । उस्रा । असि । मम । भोगाय । भव । हयः । असि । मम । भोगाय । भव । **7 (50)**

**1.2.3.3**

छागोऽसि मम भोगाय भव मेषोऽसि मम भोगाय भव वायवे त्वा
वरुणाय त्वा निर्.ऋत्यै त्वा रुद्राय त्वा देवीरापो अपां नपाद्य
ऊर्मिर्.हविष्य इन्द्रियावान्–मदिन्तमस्तं ँवो माऽव क्रमिषमच्छिन्नं
तन्तुं पृथिव्या अनु गेषं भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते
अस्त्वथेमव स्य ( ) वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीर
एदमगन्म देवयजनं पृथिव्या विश्वे देवा यदजुषन्त पूर्व ऋख्
सामाभ्यां ँयजुषा सन्तरन्तो रायस्पोषेण समिषा मदेम ॥ **8**

**1.2.3.3**

छागः । असि । मम । भोगाय । भव । मेषः । असि । मम । भोगाय ।
भव । वायवे । त्वा । वरुणाय । त्वा । निर्.ऋत्या इति निः– ऋत्यै ।
त्वा । रुद्राय । त्वा । देवीः । आपः । अपाम् । नपात् । यः । ऊर्मिः ।
हविष्यः। इन्द्रियावानितीन्द्रिय – वान् । मदिन्तमः । तम् । वः । मा ।
अवेति । क्रमिषम् । अच्छिन्नम् । तन्तुम् । पृथिव्याः । अन्विति ।
गेषम् । भद्रात् । अभीति । श्रेयः । प्रेति । इहि । बृहस्पतिः ।

पुर एतेति पुरः – एता । ते । अस्तु । अथ । ईम् । अवेति ।

स्य ( ) । वरे । एति । पृथिव्याः। आरे । शत्रून् । कृणुहि । सर्ववीर

इति सर्व – वीरः । एति । इदम् । अगन्म । देवयजनमिति

देव – यजनम् । पृथिव्याः । विश्वे । देवाः । यत् । अजुषन्त । पूर्वे ।

ऋख्सामाभ्यामित्यृख्साम –भ्याम् । यजुषा । संतरन्त इति

सं – तरन्तः । रायः । पोषेण । समिति । इषा । मदेम ॥ **8 (75)**

**(आ त्वᳲ–हयोऽसि मम भोगाय भव–स्य–पञ्चविᳲशतिश्च)** *(A3)*

**1.2.4.1**

इयं ते शुक्र तनूरिदं ँवर्चस्तया सं भव भ्राजं गच्छ जूरसि धृता

मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय

स्वाहा शुक्रमस्य–मृतमसि वैश्वदेवᳲ हविः सूर्यस्य चक्षुराऽरुहमग्ने

रक्ष्णः कनीनिकां ँयदेत शेभिरीयसे भ्राजमानो विपश्चिता चिदसि

मनाऽसि धीरसि दक्षिणा – [ ] **9**

**1.2.4.1**

इयम् । ते । शुक्र । तनूः । इदम् । वर्चः । तया । समिति । भव ।

भ्राजम् । गच्छ । जूः । असि । धृता । मनसा । जुष्टा । विष्णवे ।

तस्याः । ते । सत्यसवस इति सत्य – सवसः । प्रसवे इति

प्र –सवे । वाचः । यन्त्रम् । अशीय । स्वाहा । शुक्रम् । असि ।

अमृतम् । असि । वैश्वदेवमिति वैश्व –देवम् । हविः । सूर्यस्य ।

चक्षुः । एति । अरुहम् । अग्नेः । अक्ष्णः । कनीनिकाम् । यत् ।

एतशेभिः । ईयसे । भ्राजमानः । विपश्चिता । चित् । असि । मना ।

असि । धीः । असि । दक्षिणा । **9 (50)**

**1.2.4.2**

ऽसि यज्ञियाऽसि क्षत्रिया ऽस्यदिति–रस्युभयतः शीर्.ष्णी सा नः

सुप्राची सुप्रतीची सं भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः

पात्विन्द्राया–ध्यक्षायानु त्वा माता मन्यतामनु पिताऽनु भ्राता

सगर्भ्योऽनु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ

रुद्रस्त्वा ऽऽ*वर्तयतु मित्रस्य पथा स्वस्ति सोम सखा ( )

पुनरेहि सह रय्या ॥ **10**

**1.2.4.2**

असि । यज्ञिया । असि । क्षत्रिया । असि । अदितिः । असि ।

उभयतः शीर्ष्णीत्युभयतः–शीर्ष्णी । सा । नः । सुप्राचीति सु–प्राची ।

सुप्रतीचीति सु – प्रतीची । समिति । भव । मित्रः ।

त्वा । पदि । बध्नातु । पूषा । अध्वनः । पातु । इन्द्राय ।

अध्यक्षायेत्यधि – अक्षाय । अन्विति । त्वा । माता । मन्यताम् ।

अन्विति । पिता । अन्विति । भ्राता । सगर्भ्य इति स – गर्भ्यः ।

अन्विति । सखा । सयूथ्य इति स – यूथ्यः । सा । देवि । देवम् ।

अच्छ । इहि । इन्द्राय । सोमम् । रुद्रः । त्वा । एति । वर्तयतु ।

मित्रस्य । पथा । स्वस्ति । सोमसखेति सोम – सखा ( ) । पुनः ।

एति । इहि । सह । रय्या ॥ **10 (55)**

**( दक्षिणा–सोमसखा–पञ्च च )** *(A4)*

**1.2.5.1**

वस्व्यसि रुद्राऽस्यदिति–रस्यादित्याऽसि शुक्राऽसि चन्द्राऽसि
बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु पृथिव्यास्त्वा
मूर्धन्ना जिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलिखित॰
रक्षः परिलिखिता अरातय इदमह॰ रक्षसो ग्रीवा अपि कृन्तामि
योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा – [ ] **11**

**1.2.5.1**

वस्वी । असि । रुद्रा । असि । अदितिः । असि । आदित्या । असि ।
शुक्रा । असि । चन्द्रा । असि । बृहस्पतिः । त्वा । सुम्ने । रण्वतु ।
रुद्रः । वसुभिरिति वसु –भिः । एति । चिकेतु । पृथिव्याः । त्वा ।
मूर्धन् । एति। जिघर्मि । देवयजन इति देव – यजने । इडायाः ।
पदे । घृतवतीति घृत – वति । स्वाहा । परिलिखितमिति
परि – लिखितम् । रक्षः । परिलिखिता इति परि – लिखिताः ।
अरातयः । इदम् । अहम् । रक्षसः । ग्रीवाः । अपीति । कृन्तामि ।

यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । इदम् । अस्य ।

ग्रीवाः । **11 (50)**

**1.2.5.2**

अपि कृन्ताम्यस्मे रायस्त्वे रायस्तोते रायः सं देवि देव्योर्वश्या पश्यस्व

त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं ँ विदेय तव संदृशि

माऽहꣳ रायस्पोषेण वि योषं ॥ **12**

**1.2.5.2**

अपीति । कृन्तामि । अस्मे इति । रायः । त्वे इति । रायः । तोते ।

रायः । समिति । देवि । देव्या । उर्वश्या । पश्यस्व । त्वष्टीमती । ते ।

सपेय । सुरेता इति सु – रेताः । रेतः । दधाना । वीरम् । विदेय ।

तव । संदृशीति सं – दृशि । मा । अहम् । रायः । पोषेण ।

वीति । योषम् ॥ **12 (29)** ( **अस्य ग्रीवा–एकान्न त्रिꣳशाच्च** ) *(A5)*

**1.2.6.1**

अꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय

रसो अच्युतो ऽमात्योऽसि शुक्रस्ते ग्रहोऽभि त्यं देवꣳ

सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं

मतिमूर्ध्वा यस्यामतिर्भा अदिद्युतथ् सवीमनि हिरण्य पाणिरमिमीत सुक्रतुः कृपा सुवः । प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु ( ) प्राणिहि प्रजास्त्वामनु प्राणन्तु ॥ **13**

**1.2.6.1**

अ॒ꣳशुना । ते । अ॒ꣳशुः । पृच्यताम् । परुषा । परुः । गन्धः । ते । कामम् । अवतु । मदाय । रसः । अच्युतः । अमात्यः । असि । शुक्रः । ते । ग्रहः । अभीति । त्यम् । देवम् । सवितारम् । ऊण्योः । कविक्रतुमिति कवि – क्रतुम् । अर्चामि । सत्यसवसमिति सत्य –सवसम् । रत्नधामिति रत्न – धाम् । अभीति । प्रियम् । मतिम् । ऊर्ध्वा । यस्य । अमतिः । भाः । अदिद्युतत् । सवीमनि । हिरण्यपाणिरिति हिरण्य – पाणिः । अमिमीत । सुक्रतुरिति सु – क्रतुः । कृपा । सुवः ॥ प्रजाभ्य इति प्र – जाभ्यः । त्वा । प्राणायेति प्र – अनाय । त्वा । व्यानायेति वि – अनाय । त्वा । प्रजा इति प्र – जाः । त्वम् । अनु ( ) । प्रेति । अनिहि । प्रजा इति प्र – जाः । त्वाम् । अनु । प्रेति । अनन्तु ॥ **13 (57)**

## (अनु – सप्त च )(A6)

**1.2.7.1**

सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं ँवीर्यावन्तमभि मातिषाह७ं
शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणा–मृतममृतेन सम्यत्ते
गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापते र्वर्णस्तस्यास्ते सहस्रपोषं
पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः
श्रयन्तामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा
इन्द्रस्योरु ( ) मा विश दक्षिण–मुशन्नुशन्त७ं स्योनः स्योन७
स्वान भ्राजाङ्घारे बंभारे हस्त सुहस्त कृशानवेते वः सोम
क्रयणास्तान् रक्षध्वं मा वो दभन् ॥ **14**

**1.2.7.1**

सोमम् । ते । क्रीणामि । ऊर्जस्वन्तम् । पयस्वन्तम् । वीर्यावन्तमिति
वीर्य – वन्तम् । अभिमातिषाहमित्यभिमाति – साहम् । शुक्रम् । ते ।
शुक्रेण । क्रीणामि । चन्द्रम् । चन्द्रेण । अमृतम् । अमृतेन । सम्यत् ।
ते । गोः । अस्मे इति । चन्द्राणि । तपसः । तनूः । असि ।

प्रजापतेरिति प्रजा – पतेः । वर्णः । तस्याः । ते । सहस्रपोषमिति सहस्र –पोषम् । पुष्यन्त्याः । चरमेण । पशुना । क्रीणामि । अस्मे इति । ते । बन्धुः । मयि । ते । रायः । श्रयन्ताम् । अस्मे इति । ज्योतिः । सोमविक्रयिणीति सोम – विक्रयिणि । तमः । मित्रः । नः । एति । इहि । सुमित्रधा इति सुमित्र – धाः । इन्द्रस्य । ऊरुम् ( ) । एति । विश । दक्षिणम् । उशन्न् । उशन्तम् । स्योनः । स्योनम् । स्वान । भ्राज । अङ्घारे । बंभारे । हस्त । सुहस्तेति सु – हस्त । कृशानविति कृश – अनो । एते । वः । सोमक्रयणा इति सोम – क्रयणाः । तान् । रक्षध्वम् । मा । वः । दभन्न् ॥ **14 (72) (ऊरुं–द्वावि॒ंशतिश्च)** *(A7)*

**1.2.8.1**

उदायुषा स्वायुषोदोषधीना॒ं रसेनोत् पर्जन्यस्य शुष्मेणो दस्थाममृता॒ं अनु । उर्वन्तरिक्षमन्विह्यदित्याः सदोऽस्यदित्याः सद आ सीदास्तभ्नाद्–द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या

आऽसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरिक्षं ततान वाजमर्वथ्सु पयो अघ्नियासु हृथ्सु – [ ] **15**

**1.2.8.1**

उदिति । आयुषा । स्वायुषेति सु – आयुषा । उदिति । ओषधीनाम् । रसेन । उदिति । पर्जन्यस्य । शुष्मेण । उदिति । अस्थाम् । अमृतान् । अनु ॥ उरु । अन्तरिक्षम् । अन्विति । इहि । अदित्याः । सदः । असि । अदित्याः । सदः । एति । सीद । अस्तभ्नात् । द्याम् । ऋषभः । अन्तरिक्षम् । अमिमीत । वरिमाणम् । पृथिव्याः । एति । असीदत् । विश्वा । भुवनानि । संराडिति सं –राट् । विश्वा । इत् । तानि । वरुणस्य । व्रतानि । वनेषु । वीति । अन्तरिक्षम् । ततान । वाजम् । अर्वथ्स्वित्यर्वत् – सु । पयः । अघ्नियासु । हृथ्स्विति हृत् – सु । **15 (50)**

**1.2.8.2**

क्रतुं ँवरुणो विक्ष्वग्निं दिवि सूर्यमदधाथ् सोममद्रावुदु त्यं जातवेदसं देवं ँवहन्ति केतवः । दृशे विश्वाय सूर्यं ॥ उस्रावेतं धूर्.षाहावनश्रू

अवीरहणौ ब्रह्मचोदनौ वरुणस्य स्कंभनमसि वरुणस्य

स्कंभसर्जनमसि प्रत्यस्तो वरुणस्य पाशः ॥ **16**

**1.2.8.2**

क्रतुम् । वरुणः । विक्षु । अग्निम् । दिवि । सूर्यम् । अदधात् ।

सोमम् । अद्रौ । उदिति । उ । त्यम् । जातवेदसमिति

जात – वेदसम् । देवम् । वहन्ति । केतवः ॥ दृशे । विश्वाय ।

सूर्यम् ॥ उस्रौ । एति । इतम् । धूर्.षाहाविति धूः – साहौ ।

अनश्रू इति । अवीरहणावित्यवीर – हनौ । ब्रह्मचोदनाविति

ब्रह्म – चोदनौ । वरुणस्य । स्कंभनम् । असि । वरुणस्य ।

स्कंभसर्जनमिति स्कंभ – सर्जनम् । असि । प्रत्यस्त इति

प्रति – अस्तः । वरुणस्य । पाशः ॥ **16 (35)**

**( हृथ्सु–पञ्चत्रिꣳशच्च )** *(A8)*

**1.2.9.1**

प्र च्यवस्व भुवस्पते विश्वान्यभि धामानि मा त्वा परिपरी विदन्मा त्वा

परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरा

दघच्छ्येनो भूत्वा परा पत यजमानस्य नो गृहे देवैः स७स्कृतं ँयजमानस्य स्वस्त्ययन्यस्यपि पन्थामगस्महि स्वस्ति गामनेहसं ँयेन विश्वाः परि द्विषो वृणक्ति विन्दते वसु नमो मित्रस्य ( ) वरुणस्य चक्षसे महो देवाय तदृत७ं सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय श७ंसत वरुणस्य स्कंभनमसि वरुणस्य स्कंभसर्जन–मस्युन्मुक्तो वरुणस्य पाशः ॥ **17**

**<u>1.2.9.1</u>**

प्रेति । च्यवस्व । भुवः । पते । विश्वानि । अभीति । धामानि । मा । त्वा । परिपरीति परि – परी । विदत् । मा । त्वा । परिपन्थिन इति परि – पन्थिनः । विदन्न् । मा । त्वा । वृकाः । अघायव इत्यघ – यवः । मा । गन्धर्वः । विश्वावसुरिति विश्व – वसुः । एति । दघत् । श्येनः । भूत्वा । परेति । पत । यजमानस्य । नः । गृहे । देवैः । स७स्कृतम् । यजमानस्य । स्वस्त्ययनीति स्वस्ति – अयनी । असि । अपीति । पन्थाम् । अगस्महि । स्वस्तिगामिति स्वस्ति – गाम् । अनेहसम् । येन । विश्वाः । परीति ।

द्विषः । वृणक्ति । विन्दते । वसु । नमः । मित्रस्य ( ) । वरुणस्य ।
चक्षसे । महः । देवाय । तत् । ऋतम् । सपर्यत । दूरेदृश इति
दूरे – दृशे । देवजातायेति देव – जाताय । केतवे । दिवः ।
पुत्राय । सूर्याय । शꣳसत । वरुणस्य । स्कंभनम् । असि ।
वरुणस्य । स्कंभसर्जनमिति स्कंभ – सर्जनम् । असि ।
उन्मुक्त इत्युत् – मुक्तः । वरुणस्य । पाशः ॥ **17 (73)**

**( मित्रस्य–त्रयोविꣳशतिश्च )** *(A9)*

**<u>1.2.10.1</u>**

अग्ने–रातिथ्यमसि विष्णवे त्वा सोमस्याऽऽ*तिथ्यमसि विष्णवे त्वा–ऽतिथेरातिथ्यमसि विष्णवे त्वाऽग्नये त्वा रायस्पोषदाव्न्ने विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानदित्याः सदोऽस्यदित्याः सद आ – [ ] **18**

**1.2.10.1**

अग्नेः । आतिथ्यम् । असि । विष्णवे । त्वा । सोमस्य । आतिथ्यम् । असि । विष्णवे । त्वा । अतिथेः । आतिथ्यम् । असि । विष्णवे । त्वा । अग्नये । त्वा । रायस्पोषदाव्न्न इति रायस्पोष – दाव्न्ने । विष्णवे । त्वा । श्येनाय । त्वा । सोमभृत इति सोम – भृते । विष्णवे । त्वा । या । ते । धामानि । हविषा । यजन्ति । ता । ते । विश्वा । परिभूरिति परि – भूः । अस्तु । यज्ञम् । गयस्फान इति गय – स्फानः । प्रतरण इति प्र – तरणः । सुवीर इति सु–वीरः। अवीरहेत्यवीर – हा । प्रेति । चर । सोम । दुर्यान् । अदित्याः । सदः । असि । अदित्याः । सदः । एति । **18 (50)**

**1.2.10.2**

सीद वरुणोऽसि धृतव्रतो वारुणमसि शँयोर्देवाना॒ सख्यान्मा देवाना–मपसश्छिथ्स्मह्यापतये त्वागृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वागृह्णामि शाक्वराय त्वा गृह्णामि शक्मन्–नोजिष्ठाय त्वा गृह्णाम्य –नाधृष्टमस्य–नाधृष्यं देवानामोजोऽभिषस्तिपा

अनभिशस्तेऽन्यमनु मे दीक्षां दीक्षापति र्मन्यतामनु
तपस्तपस्पतिरञ्जसा सत्यमुप गेषꣳ सुविते मा ( ) धाः ॥ **19**

**1.2.10.2**

सीद । वरुणः । असि । धृतव्रत इति धृत – व्रतः । वारुणम् ।
असि । शंयोरिति शं – योः । देवानाम् । सख्यात् । मा । देवानाम् ।
अपसः । छिथ्स्महि । आपतय इत्या – पतये । त्वा । गृह्णामि ।
परिपतय इति परि – पतये । त्वा । गृह्णामि । तनूनप्त्र इति
तनू – नप्त्रे । त्वा । गृह्णामि । शाक्वराय । त्वा । गृह्णामि । शक्मन्न् ।
ओजिष्ठाय । त्वा । गृह्णामि । अनाधृष्टमित्यना – धृष्टम् । असि ।
अनाधृष्यमित्यना – धृष्यम् । देवानाम् । ओजः । अभिशस्तिपा
इत्यभिशस्ति – पाः । अनभिशस्तेन्यमित्यनभि – शस्तेन्यम् ।
अन्विति । मे । दीक्षाम् । दीक्षापतिरिति दीक्षा – पतिः । मन्यताम् ।
अन्विति । तपः । तपस्पतिरिति तपः – पतिः । अञ्जसा । सत्यम् ।
उपेति । गेषम् । सुविते । मा ( ) । धाः ॥ **19 (51)**

**( अमै–कं च )** *(A10)*

**1.2.11.1**

अ॒ꣳशुर॒ꣳशुस्ते देव सोमाऽऽ*प्यायता–मिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽ*प्यायय सखीन्थ् सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि – [ ] **20**

**1.2.11.1**

अ॒ꣳशुर॒ꣳशुरित्य॒ꣳशुः – अ॒ꣳशुः । ते । देव । सोम । एति । प्यायताम् । इन्द्राय । एकधनविद इत्येकधन – विदे । एति । तुभ्यम् । इन्द्रः । प्यायताम् । एति । त्वम् । इन्द्राय । प्यायस्व । एति । प्यायय । सखीन् । सन्या । मेधया । स्वस्ति । ते । देव । सोम । सुत्याम् । अशीय । एष्टः । रायः । प्रेति । इषे । भगाय । ऋतम् । ऋतवादिभ्य इत्यृतवादि – भ्यः । नमः । दिवे । नमः । पृथिव्यै । अग्ने । व्रतपत इति व्रत – पते । त्वम् । व्रतानाम् । व्रतपतिरिति व्रत – पतिः । असि । या । मम । तनूः । एषा । सा । त्वयि । **20 (50)**

**1.2.11.2**

या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि

या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा

या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्.षिष्ठा गह्वरेष्ठोऽग्रं

ँवचो अपावधीं त्वेषं ँवचो अपावधीꣷ स्वाहा ॥ **21**

**1.2.11.2**

या । तव । तनूः । इयम् । सा । मयि । सह । नौ । व्रतपत इति

व्रत – पते । व्रतिनोः । व्रतानि । या । ते । अग्ने । रुद्रिया । तनूः ।

तया । नः । पाहि । तस्याः । ते । स्वाहा । या । ते । अग्ने ।

अयाशयेत्यया – शया । रजाशयेति रजा – शया ।

हराशयेति हरा – शया । तनूः । वर्.षिष्ठा । गह्वरेष्ठेति गह्वरे – स्था ।

उग्रम् । वचः । अपेति । अवधीम् । त्वेषम् । वचः । अपेति ।

अवधीम् । स्वाहा ॥ **21 (40)** **( त्वयि–चत्वारिꣳशच्च )** *(A11)*

**1.2.12.1**

वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मा नाथितमवतान्मा व्यथितं

ँविदेरग्निर्नभो नामाग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्नेहि

यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽ*दधेऽग्ने अङ्गिरो यो द्वितीयस्यां तृतीयस्यां पृथिव्या–मस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम – [ ] 22

**1.2.12.1**

वित्तायनीति वित्त – अयनी । मे । असि । तिक्तायनीति तिक्त – अयनी । मे । असि । अवतात् । मा । नाथितम् । अवतात् । मा । व्यथितम् । विदेः । अग्निः । नभः । नाम । अग्ने । अङ्गिरः । यः । अस्याम् । पृथिव्याम् । असि । आयुषा । नाम्ना । एति । इहि । यत् । ते । अनाधृष्टमित्यना – धृष्टम् । नाम । यज्ञियम् । तेन । त्वा । एति । दधे । अग्ने । अङ्गिरः । यः । द्वितीयस्याम् । तृतीयस्याम् । पृथिव्याम् । असि । आयुषा । नाम्ना । एति । इहि । यत् । ते । अनाधृष्टमित्यना – धृष्टम् । नाम । 22 (50)

**1.2.12.2**

यज्ञियं तेन त्वाऽऽ*दधे सिꣳहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतां ध्रुवाऽसि देवेभ्यः शुन्धस्व देवेभ्यः शुंभस्वेन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु मनोजवास्त्वा पितृभि

र्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात् पातु विश्वकर्मा
त्वाऽऽदित्यैरुत्तरतः पातु सिꣳहीरसि सपत्नसाही स्वाहा
सिꣳहीरसि सुप्रजावनिः स्वाहा सिꣳही – [ ] **23**

**1.2.12.2**

यज्ञियम् । तेन । त्वा । एति । दधे । सिꣳहीः । असि । महिषीः ।
असि । उरु । प्रथस्व । उरु । ते । यज्ञपतिरिति यज्ञ – पतिः ।
प्रथताम् । ध्रुवा । असि । देवेभ्यः । शुन्धस्व । देवेभ्यः । शुंभस्व ।
इन्द्रघोष इतीन्द्र – घोषः । त्वा । वसुभिरिति वसु – भिः ।
पुरस्तात् । पातु । मनोजवा इति मनः – जवाः । त्वा । पितृभिरिति
पितृ – भिः । दक्षिणतः । पातु । प्रचेता इति प्र – चेताः । त्वा ।
रुद्रैः । पश्चात् । पातु । विश्वकर्मेति विश्व – कर्मा । त्वा ।
आदित्यैः । उत्तरत इत्युत् – तरतः । पातु । सिꣳहीः । असि ।
सपत्नसाहीति सपत्न – साही । स्वाहा । सिꣳहीः । असि ।
सुप्रजावनिरिति सुप्रजा – वनिः । स्वाहा । सिꣳहीः । **23 (50)**

**1.2.12.3**

रसि रायस्पोषवनिः स्वाहा सि॒ꣳहीरस्या–दित्यवनिः स्वाहा सि॒ꣳहीरस्या वह देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्ने भर्स्मास्यग्नेः पुरीषमसि ॥ **24**

**1.2.12.3**

असि । रायस्पोषवनिरिति रायस्पोष – वनिः । स्वाहा । सि॒ꣳहीः । असि । आदित्यवनिरित्यादित्य – वनिः । स्वाहा । सि॒ꣳहीः । असि । एति । वह । देवान् । देवयत इति देव – यते । यजमानाय । स्वाहा । भूतेभ्यः । त्वा । विश्वायुरिति विश्व – आयुः । असि । पृथिवीम् । दृꣳह । ध्रुवक्षिदिति ध्रुव – क्षित् । असि । अन्तरिक्षम् । दृꣳह । अच्युतक्षिदित्यच्युत –क्षित् । असि । दिवम् । दृꣳह । अग्नेः । भस्म । असि । अग्नेः । पुरीषम् । असि ॥ **24 (35)**

**(नाम–सुप्रजावनिः स्वाहा सि॒ꣳहिः–पञ्चत्रिꣳशच्च )***(A12)*

**1.2.13.1**

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुना विदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥
सुवाग्देव दुर्याꣳ आ वद देवश्रुतौ देवेष्वा घोषेथामा नो
वीरो जायतां कर्मण्यो यꣳ सर्वेऽनु जीवाम यो बहूनामसद्वशी ।
इदं विँष्णु र्विचक्रमे त्रेधा नि दधे पदं । स मूढमस्य – [ ] 25

**1.2.13.1**

युञ्जते । मनः । उत । युञ्जते । धियः । विप्राः । विप्रस्य । बृहतः ।
विपश्चितः ॥ वीति । होत्राः । दधे । वयुनाविदिति वयुन – वित् ।
एकः । इत् । मही । देवस्य । सवितुः । परिष्टुतिरिति परि– स्तुतिः ॥
सुवागिति सु– वाक् । देव । दुर्यान् । एति । वद । देवश्रुताविति
देव – श्रुतौ । देवेषु । एति । घोषेथाम् । एति । नः । वीरः ।
जायताम् । कर्मण्यः । यम् । सर्वे । अनुजीवामेत्यनु – जीवाम ।
यः । बहूनाम् । असत् । वशी ॥ इदम् । विष्णुः । वीति । चक्रमे ।
त्रेधा । नीति । दधे । पदम् ॥ समूढमिति सम् – ऊढम् । अस्य ।
25 (50)

**1.2.13.2**

पा॒ऽसुर इरावती धेनुमती हि भूत॒ँ सूयवसिनी मनवे
यशस्ये । व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः ॥
प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वँ यज्ञं नयतं मा जीह्वरतमत्र रमेथां
ँवर्.ष्मन् पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत
वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्र यच्छ – [ ] **26**

**1.2.13.2**

पा॒ऽसुरे । इरावती इतीरा – वती । धेनुमती इति धेनु – मती । हि ।
भूतम् । सूयवसिनी इति सू – यवसिनी । मनवे । यशस्ये इति ॥
वीति । अस्कभ्नात् । रोदसी इति । विष्णुः । एते इति । दाधार ।
पृथिवीम् । अभितः । मयूखैः ॥ प्राची इति । प्रेति । इतम् । अध्वरम् ।
कल्पयन्ती इति । ऊर्ध्वम् । यज्ञम् । नयतम् । मा । जीह्वरतम् । अत्र ।
रमेथाम् । वर्.ष्मन्न् । पृथिव्याः । दिवः । वा । विष्णो । उत । वा ।
पृथिव्याः । महः । वा । विष्णो । उत । वा । अन्तरिक्षात् । हस्तौ ।
पृणस्व । बहुभिरिति बहु – भिः । वसव्यैः । आ । प्रेति । यच्छ । **26**
**(50)**

**1.2.13.3**

दक्षिणादोत सव्यात् ।

विष्णोर्नुकं ँवीर्याणि प्र वोचं ँयः पार्थिवानि विममे रजा॑ꣳसि यो

अस्कभायदुत्तरꣳ सधस्थं ँविचक्रमाण स्त्रेधोरुगायो

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रे स्थो

विष्णोः स्यूरसि विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ **27**

**1.2.13.3**

दक्षिणात् । एति । उत । सव्यात् ॥ विष्णोः । नुकम् । वीर्याणि ।

प्रेति । वोचम् । यः । पार्थिवानि । विमम इति वि – ममे ।

रजाꣳसि । यः । अस्कभायत् । उत्तरमित्युत् – तरम् ।

सधस्थमिति सध – स्थम् । विचक्रमाण इति वि – चक्रमाणः ।

त्रेधा । उरुगाय इत्युरु – गायः । विष्णोः । रराटम् । असि । विष्णोः ।

पृष्ठम् । असि । विष्णोः । श्नप्त्रे इति । स्थः । विष्णोः । स्यूः । असि ।

विष्णोः । ध्रुवम् । असि । वैष्णवम् । असि । विष्णवे । त्वा ॥ **27 (39)**

**( अस्य–यच्छै–कान्न चत्वारिꣳशच्च )** *(A13)*

**1.2.14.1**

कृणुष्व पाजः प्रसितिन्न पृथ्वीँ याहि राजे वामवा॒ँ इभे न ।
तृष्वीमनु प्रसितिं–द्रूणानोऽस्ताऽसि विध्य रक्षस स्तपिष्ठैः ॥
तव भ्रमास आशुया पतंत्यनु स्पृश–धृषता शोशुचानः ।
तपू॒ँष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्व गुल्काः ॥
प्रतिस्पशो विसृज–तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघश॒ँसो – [ ] **28**

**1.2.14.1**

कृणुष्व । पाजः । प्रसितिमिति प्र – सितिम् । न । पृथ्वीम् । याहि ।
राजा । इव । अमवानित्यम – वान् । इभेन ॥ तृष्वीम् । अन्विति ।
प्रसितिमिति प्र – सितिम् । द्रूणानः । अस्ता । असि । विध्य ।
रक्षसः । तपिष्ठैः ॥ तव । भ्रमासः । आशुया । पतन्ति । अन्विति ।
स्पृश । धृषता । शोशुचानः ॥ तपू॒ँषि । अग्ने । जुह्वा । पतङ्गान् ।
असन्दित इत्यसं – दितः । वीति । सृज । विष्वक् । उल्काः ॥
प्रतीति । स्पशः । वीति । सृज । तूर्णितम इति तूर्णि – तमः ।

भव । पायुः । विशः । अस्याः । अदब्दः ॥ यः । नः । दूरे । अघशꣳस इत्यघ – शꣳसः । **28 (50)**

**1.2.14.2**

यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्.षीत् ॥
उदग्ने तिष्ठ प्रत्या *ऽऽतनुष्व न्यमित्राꣳ ओषतात् तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥
ऊर्ध्वो भव प्रतिविध्या–ऽध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अवस्थिरा तनुहि यातु जूनां जामिमजामिं प्रमृणीहि शत्रून् ॥
स ते – [ ] **29**

**1.2.14.2**

यः । अन्ति । अग्ने । माकिः । ते । व्यथिः । एति । दधर्.षीत् ॥ उदिति । अग्ने । तिष्ठ । प्रेति । एति । तनुष्व । नीति । अमित्रान् । ओषतात् । तिग्महेत इति तिग्म – हेते ॥ यः । नः । अरातिम् । समिधानेति सम् – इधान । चक्रे । नीचा । तम् । धक्षि । अतसम् । न । शुष्कम् ॥ ऊर्ध्वः । भव । प्रतीति । विद्ध्य । अधीति ।

अस्मत् । आविः । कृणुष्व । दैव्यानी । अग्ने ॥ अवेति । स्थिरा ।
तनुहि । यातुजूनाम् । जामिम् । अजामिम् । प्रेति । मृणीहि ।
शत्रून् ॥ सः । ते । **29 (50)**

**1.2.14.3**

जानाति सुमतिं यविष्ठय ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभि द्यौत् ॥
सेदग्ने अस्तु सुभगः सुदानु–र्यस्त्वा नित्येन हविषाय उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः ॥
अर्चामि ते सुमतिं घोष्यर्वाख्–सन्ते वा वा ता जरता – [ ] **30**

**1.2.14.3**

जानाति । सुमतिमिति सु – मतिम् । यविष्ठ । यः । ईवते । ब्रह्मणे ।
गातुम् । ऐरत् ॥ विश्वानि । अस्मै । सुदिनानीति सु – दिनानि ।
रायः । द्युम्नानि । अर्यः । वीति । दुरः । अभीति । द्यौत् ॥ सः । इत् ।
अग्ने । अस्तु । सुभग इति सु – भगः । सुदानुरिति सु – दानुः ।
यः । त्वा । नित्येन । हविषा । यः । उक्थैः ॥ पिप्रीषति । स्वे ।

आयुषि । दुरोण इति दुः – ओने । विश्वा । इत् । अस्मै । सुदिनेति सु– दिना । सा । असत् । इष्टिः ॥ अर्चामि । ते । सुमतिमिति सु – मतिम् । घोषि । अर्वाक् । समिति । ते । वावाता ।

जरतां । **30 (50)**

**1.2.14.4**

मियंगीः । स्वश्वास्त्वा सुरथा मर्जये–मास्मे क्षत्राणि धारयेरनु द्यून् ॥

इह त्वा भूर्या चरे दुपत्मन्–दोषावस्त दीदिवाꣳसमनु द्यून् ।

क्रीडन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवाꣳ सो जनानां ॥

यस्त्वा–स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।

तस्य त्राता–भवसि तस्य सखा यस्त आतिथ्य मानुषग् जुजोषत् ॥

महो रुजामि – [ ] **31**

**1.2.14.4**

इयम् । गीः ॥ स्वश्वा इति सु – अश्वाः । त्वा । सुरथा इति सु – रथाः । मर्जयेम । अस्मे इति । क्षत्राणि । धारयेः । अन्विति । द्यून् ॥ इह । त्वा । भूरि । एति । चरेत् । उपेति । त्मन्न् ।

दोषावस्तरिति दोषा – वस्तः । दीदिवा॒ꣳसम् । अन्विति । द्यून् ॥

क्रीडन्तः । त्वा । सुमनस इति सु – मनसः । सपेम । अभीति ।

द्युम्ना । तस्थिवा॒ꣳसः । जनानाम् ॥ यः । त्वा । स्वश्व इति

सु – अश्वः । सुहिरण्य इति सु – हिरण्यः । अग्ने ।

उपयातीत्युप – याति । वसुमतेति वसु – मता । रथेन ॥ तस्य ।

त्राता । भवसि । तस्य । सखा । यः । ते । आतिथ्यम् । आनुषक् ।

जुजोषत् ॥ महः । रुजामि । **31 (50)**

**1.2.14.5**

बन्धुता वचोभिस्तन्मा पितुर्गोतमाद-न्वियाय ।

त्वन्नो अस्य वचस-श्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥

अस्वप्नज स्तरणयः सुशेवा अतन्द्रा सोऽवृका अश्रमिष्ठाः ।

ते पायवः सध्रियञ्चो निषद्याऽग्ने तवनः पान्त्वमूर ॥

ये पायवो मामतेयंते अग्ने पश्यन्तो अन्धं दुरिताद रक्षन्न् ।

ररक्षतान्थ् सुकृतो विश्ववेदा दिफ्सन्त इद्रिपवो ना ह – [ ] **32**

**1.2.14.5**

बन्धुता । वचोभिरिति वचः – भिः । तत् । मा । पितुः । गोतमात् ।
अन्विति । इयाय ॥ त्वम् । नः । अस्य । वचसः । चिकिद्धि । होतः ।
यविष्ठ । सुक्रतो इति सु – क्रतो । दमूनाः ॥ अस्वप्नज
इत्यस्वप्न – जः । तरणयः । सुशेवा इति सु–शेवाः । अतन्द्रासः ।
अवृकाः । अश्रमिष्ठाः ॥ ते । पायवः । सध्रियञ्चः । निषद्येति
नि – सद्य । अग्ने । तव । नः । पान्तु । अमूर ॥ ये । पायवः ।
मामतेयम् । ते । अग्ने । पश्यन्तः । अन्धम् । दुरितादिति
दुः – इतात् । अरक्षन्न् ॥ ररक्ष । तान् । सुकृत इति सु – कृतः ।
विश्ववेदा इति विश्व – वेदाः । दिप्सन्तः । इत् । रिपवः ।
न । ह । **32 (50)**

**1.2.14.6**

देभुः ॥

त्वया वयꣳ सधन्य–स्त्वोता–स्तव प्रणीत्य श्याम वाजान् ।
उभा शꣳसा सूदय सत्यताते–ऽनुष्ठुया कृणुह्य–ह्रयाण ॥

अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥
रक्षोहणं ँवाजिनमाजि घर्मि मित्रं प्रथिष्ठ–मुपयामि शर्म ।
शिशानो अग्निः क्रतुभिः–समिद्धः–सनो दिवा – [ ] **33**

**1.2.14.6**

देभुः ॥ त्वया । वयम् । सधन्य इति सध – न्यः । त्वोताः । तव ।
प्रणीतीति प्र – नीती । अश्याम । वाजान् ॥ उभा । शꣳसा । सूदय ।
सत्यतात इति सत्य – ताते । अनुष्ठुया । कृणुहि । अह्रयाण ॥ अया ।
ते । अग्ने । समिधेति सं – इधा । विधेम । प्रतीति । स्तोमम् ।
शस्यमानम् । गृभाय । दह । अशसः । रक्षसः । पाहि । अस्मान् ।
द्रुहः । निदः । मित्रमह इति मित्र – महः । अवद्यात् ॥
रक्षोहणमिति रक्षः – हनम् । वाजिनम् । एति । जिघर्मि । मित्रम् ।
प्रथिष्ठम् । उपेति । यामि । शर्म ॥ शिशानः । अग्निः । क्रतुभिरिति
क्रतु – भिः । समिद्ध इति सं – इद्धः । सः । नः । दिवा । **33 (50)**

**1.2.14.7**

सरिषः पातुनक्तं ॥

विज्योतिषा बृहता भात्यग्निरावि–र्विश्वानि कृणुतेमहित्वा ।

प्रादेवी–र्मायाः सहते–दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥

उत स्वानासो दिविषन्त्वग्ने स्तिग्मायुधा रक्षसे हन्त वा उ ।

मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ **34**

**1.2.14.7**

सः । रिषः । पातु । नक्तम् ॥ वीति । ज्योतिषा । बृहता । भाति ।

अग्निः । आविः । विश्वानि । कृणुते । महित्वेति महि – त्वा ॥ प्रेति ।

अदेवीः । मायाः । सहते । दुरेवा इति दुः – एवाः । शिशीते ।

शृङ्गे इति । रक्षसे । विनिक्ष इति वि – निक्षे ॥ उत । स्वानासः ।

दिवि । सन्तु । अग्नेः । तिग्मायुधा इति तिग्म – आयुधाः । रक्षसे ।

हन्तवै । उ ॥ मदे । चित् । अस्य । प्रेति । रुजन्ति । भामाः । न ।

वरन्ते । परिबाध इति परि – बाधः । अदेवीः ॥ **34 (41)**

(अघश॒ꣳस॒ः-स ते-जरताꣳ-रुजामि-ह॒ - दिवै-कचत्वारिꣳशच्च)*(A14)*

**Prasna Korvai with starting Padamsof 1 to 14 Anuvaakams :-**

(आप उ॒न्दन्त्वा-कूत्यै॒-दैवी-मि॒यन्ते॒-वस्व्यस्य॒-ꣳशुनाते॒-सोमन्त॒-उदायुषा॒ - प्र च्यवस्वा॒-ऽग्नेराति॒थ्य-म॒ꣳशुरꣳ शुर्-वि॒त्तायनी मेऽसि - यु॒ञ्चते - कृणु॒ष्व पाज॒-श्चतुर्दश ।)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(आपो॒-वस्व्यसि॒ - या त॒वे-यज्ञी-श्चतुस्त्रिꣳशत् ।)

**First and Last Padam of Second Prasnam :-**

(आप उ॒न्दन्-त्वदेवीः ।)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे प्रथमकाण्डे

द्वितीयः प्रश्नः समाप्तः ॥

## Details of Panchati and Padam for Kandam 1 – Prasanam 2 – TS 1.2

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 2 | 108 |
| Anuvakam 2 | 3 | 130 |
| Anuvakam 3 | 3 | 175 |
| Anuvakam 4 | 2 | 105 |
| Anuvakam 5 | 2 | 79 |
| Anuvakam 6 | 1 | 57 |
| Anuvakam 7 | 1 | 72 |
| Anuvakam 8 | 2 | 85 |
| Anuvakam 9 | 1 | 73 |
| Anuvakam 10 | 2 | 101 |
| Anuvakam 11 | 2 | 90 |
| Anuvakam 12 | 3 | 135 |
| Anuvakam 13 | 3 | 139 |
| Anuvakam 14 | 7 | 341 |
| Total → | 34 | 1690 |